दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ शिशिर-ऋतुः
सूर्यः उत्तरायणम् माघशुक्लद्वितीया
माघ 07 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-6 ■ वर्ष-5 ■ अङ्क-89 | 1 | जनवरी 20, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 आईएमएफ संस्थया पुनः भारतस्य आर्थिकवृद्धेः सङ्केताः प्रदत्ताः
4 सर्वकारीय- चिकित्सालयेषु गुणवत्तापूर्णानि औषधानि उपलभ्यन्ते, शतकोटि-रूप्यकाणां निविदाः शीघ्रमेव निर्गताः भविष्यन्ति- मुख्यमंत्री
6 कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालये "महाकविकालिदास-संस्कृतव्रती राष्ट्रियपुरस्कारस्य" घोषणा कृता

## संयुक्त-अरब-अमीरात-देशस्य राष्ट्रपतिः शेख मोहम्मद बिन जायद अल नहयानः भारतस्य आधिकारिक-यात्रायां नवदेहलीं प्राप्तवान्



**हिमसंस्कृतवार्ताः** - संयुक्तारबामीरात-देशस्य राष्ट्रपतिः शेख मोहम्मद बिन जायद अल नहयानः प्रधानमन्त्रिणः श्रीनरेन्द्र-मोदिनः आमन्त्रणे भारतस्य आधिकारिक-यात्रायां भारतं सम्प्राप्तः अस्ति। प्रधानमन्त्रिणा मोदिना विमानपत्तनं गत्वा एव तस्य स्वागत-सत्कारः विहितः । अस्याः यात्रायाः अवसरे उभावपि नेतारौ उभयोः देशयोः समग्रमपि कार्यनीतिकं साहमत्यम् अग्रे वर्धयितुं चर्चाजातं करिष्यतः इति सम्भाव्यते। युगपदेव, तौ परस्परं हितानां क्षेत्रीयेषु वैश्विकेषु च प्रकरणेषु अपि विचाराणां मिथः विनिमयमपि करिष्यतः।

## स्विट्ज़रलैंड देशस्य डावोस-मध्ये विश्व-आर्थिक-मञ्चस्य षट्-पञ्चाशत् वार्षिकं सम्मेलनं प्रारभते

**हिमसंस्कृतवार्ताः** - स्विट्ज़रलैंड देशस्य डावोस-मध्ये विश्व-आर्थिक मञ्चस्य षट् पञ्चाशत् वार्षिकं सम्मेलनं प्रारभते। एतस्मिन् सम्मेलने त्रि-सहस्र-तोऽपि अधिकाः वैश्विकाः नेतारः प्रतिभागितां कुर्वन्ति। भारतादपि शताधिकाः सी.ई.ओ. अधिकारिणः बृहत् प्राशासनिकं प्रतिनिधिमंडलीयं दलं पञ्च-दिवसीय सम्भाषणोपवेशने सम्मिलितम् अस्ति। केन्द्रीय मन्त्री अश्विनी वैष्णवः, प्रह्लाद जोशी, के. राममोहन नायडुः चेति मंत्रिणः द्वै-पाक्षिकानि उपवेशनानि अपि आचरिष्यन्ति। अनेन साकमेव, महाराष्ट्रस्य, आन्ध्रप्रदेशस्य, मध्य-प्रदेशस्य, असमस्य, झारखंडस्य च मुख्यमन्त्रिणोऽपि निज-निज-राज्येषु संभावित निवेशस्य समानायनार्थं तत्र प्रस्तुताः भविष्यन्ति।

# नितिन नवीनः भारतीयजनतापक्षस्य अध्यक्षत्वेन निर्विरोधेन निर्वाचितः






**हिमसंस्कृतवार्ताः।** नितिन नवीनः भारतीयजनतापक्षस्य अध्यक्षत्वेन निर्विरोधेन निर्वाचितः अस्ति। रिटर्निंग अधिकारी के.लक्ष्मणः अवदत् यत् भाजपायाः राष्ट्रियाध्यक्षत्वेन नितिन नवीनस्य पक्षे ३७ नामाङ्कनपत्राणि पञ्जीकृतानि आसन्। भाजपा-अध्यक्षपदार्थं नितिन-नवीनस्य नामाङ्कनं प्रस्तावितेषु प्रधानमन्त्री नरेन्द्रमोदी अपि अन्यतमः आसीत् । सर्वाणि नामाङ्कनपत्राणि वैधतां प्राप्तानि। नामाङ्कने उपस्थिता आसन् दिग्गजाः भाजपापक्षस्य पूर्वाध्यक्षः जे.पी.नड्डा, रक्षामन्त्री राजनाथसिंहः ,गृहमन्त्री अमितशाहः, केन्द्रीयमन्त्री नितिनगडकरी, धर्मेन्द्रप्रधानः, भूपेन्द्रयादवः, किरेन रिजिजुः इत्यादयः अन्ये वरिष्ठनेतारः च उपस्थिताः आसन्। प्रथमः पत्रसमूहः रिटर्निंग अधिकारिणं के.लक्ष्मण इत्यस्मै प्रस्तुतम्। नवीनस्य समर्थनस्य व्यापकतां रेखांकयन् अरुणाचलप्रदेशस्य मुख्यमन्त्री पेमाखण्डुः, अनेकराज्यानां नेतारः च अतिरिक्तं नामाङ्कनं प्रदत्तवन्तः।

## भाजपापक्षस्य अध्यक्षः कथं निर्वाचितः भवति?

भारतीयजनता पक्षस्य राष्ट्रियाध्यक्षस्य निर्वाचनं निर्वाचनदलस्य राष्ट्रियपरिषदा राज्यपरिषदैः चयनितैः प्रतिनिधिभिः निर्मितेन निर्वाचनमण्डलेन क्रियते। एषा समग्रप्रक्रिया दलस्य राष्ट्रियप्रतिवेदकेन निरीक्षिता भवति । राज्यस्य निर्वाचनमण्डलस्य केऽपि २० सदस्याः संयुक्तरूपेण एतादृशं व्यक्तिं राष्ट्रियराष्ट्रपतिपदार्थं प्रस्तावयितुं शक्नुवन्ति, यः चतुर्कार्यकालपर्यन्तं दलस्य सक्रियसदस्यः स्यात् अथवा १५ वर्षाणि सदस्यतां सम्पन्नवान् अस्ति। परन्तु एतादृशः संयुक्तप्रस्तावः न्यूनातिन्यूनं पञ्चभ्यः राज्येभ्यः अवश्यमेव आगच्छेत् यत्र राष्ट्रियपरिषदः निर्वाचनं पूर्वमेव सम्पन्नम् अस्ति

## स्वर्ण-रजत-धातूनां मूल्यं भृशं वार्धितम्

स्वर्णस्य रजतस्य च मूल्यं संवर्ध्य नूतनां कीर्तिमत्तां समार्जयत्। एतत् मूल्य-वर्धनं अमेरिका-देशस्य राष्ट्रपतिना डोनाल्ड ट्रम्पेण प्रदत्तस्य नवीन-शुल्कस्य टैरिफ़ इत्यस्य तर्जनायाः अनन्तरं दृष्टिपथम् आयातम् अस्ति। मल्टी कमोडिटी एक्सचेंज इत्यत्र दश-ग्राम-मितस्य स्वर्णस्य भारस्य मूल्यं पञ्चाधिक-नव-शतोत्तर-चतुश्चत्वारिंशत्-साहस्राधिक-एक-लक्ष-रूप्यक-मितं प्राप्तम् अस्ति, यद्धि प्रतिशतं दशमलवोत्तर षट्-अष्टाधिक-एकमिता वृद्धिः वर्तते। अपरत्र च, एक किलो-ग्राम-भारस्य रजतस्य मूल्यं चतुश्शताधिक-त्रि-लक्ष-रूप्यक-मितं जातम् अस्ति, एवं रजतस्य मूल्ये प्रतिशतं दश-मलवोत्तर त्रि-नवाधिक चतुर्मितम् उच्छलनं पञ्जीकृतम् अस्ति। विशेषज्ञानां मन्तव्यमस्ति यत् वैश्विकार्थिक-अनिश्चिततानां, वाणिज्यिक चिन्तानां च कारणेन निवेशकाः सुरक्षितान् महार्घान् धातून् प्रति आकर्षिताः जाजायमानाः सन्ति, येन स्वर्ण-मूल्यं रजतमूल्यं च निरन्तरं समुच्छलति। एषा प्रवृत्तिः आगामि-कतिपय-कालं यावत् आपणं प्रभावितं करिष्यति।

## सुभाषितम्

**एकः सकलजनानां हृदयेषु,**
**कृतास्पदो मदः शत्रुः।**
**येनाविष्टशरीरे न,**
**शृणोति न पश्यति स्तब्धः॥**

मदिरापान तथा अहंकार एक महान् शत्रु के समान लोगों के मन पर पूर्ण अधिकार कर लेते हैं जिसके प्रभाव में आ कर वे उन्मत्त होकर न तो किसी की बात सुनते हैं तथा मदान्ध हो कर न अन्य लोगों की समृद्धि को ही देख सकते हैं।

दैनिकं ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य
एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## स्पेनदेशे रेलयान-द्वयस्य संघट्टे एकोनचत्वारिंशत् जनाः मृत्युमुपगताः

स्पेनदेशस्य दक्षिणीयक्षेत्रे गतसायं दुरापन्ने रेलयान-द्वयस्य संघट्टे एकोनचत्वारिंशत् जनाः मृत्युमुपगताः सन्ति, नैके च व्रणिताः इति सूच्यन्ते।एषा दुर्घटना एडामुज़-क्षेत्रस्य निकषा तदा दुरापन्ना, यदा एकं द्रुतगामि-रेलयानं रेल-पट्टिकातः अवतीर्य द्वितीय-रेल-पट्टिकायां निपतितम्, येन विपरीत दिशातः आगम्यमानं रेलयानमपि दुर्घटनाग्रस्तं जातम्।आपत्कालिक-सेवायाः अनुसारेण त्रि-सप्ततिः जनाः गम्भीर-रूपेण व्रणीभूताः सन्ति, तथा जनोद्धार-कार्य अधुनापि प्रवर्ततेतराम्। विदेशमन्त्री डॉ. एस. जयशंकरः इमां दुर्घटनाम् अभिलक्ष्य शोक-संवेदनां अभिव्यक्तीकृतवान्, साकमेव व्रणितानां शीघ्र स्वास्थ्य-लाभस्य कामनामपि प्राकटयत्।

# कृषि-कृषक-कल्याण-मन्त्रिणा शिवराज सिंहेन कांग्रेसदलम् आरोपितम्



कृषि-कृषक-कल्याण-मन्त्रिणा शिवराज सिंहेन कांग्रेसदलम् अधिक्षिप्तं यत् विकसित-भारत G RAM G अधिनियमस्य प्रकरणे कांग्रेस-दलं देशवासिषु भ्रान्तिं जनयति।नव-दिल्ल्यां चौहानवर्यः प्रत्यपादयत् यत् मनरेगा योजनायाः अन्तर्गतं कांग्रेस-दलेन प्रदत्ताः अधिकाराः केवलं कर्गदेषु एव निजम् अस्तित्वं धारयन्ति स्म, वास्तविक धरातले नासीत् अस्तित्वं तेषाम्। कांग्रेस-दलेन स्वकीया विचारधारा, आदर्शाः, सिद्धान्ताश्च परित्यक्ताः सन्ति, अथ च देशस्य विकासेन तथा निर्धनानां कल्याणेन साकं कांग्रेसस्य नास्ति कोऽपि सम्बन्धः इत्यपि तेन आरोपितम्।

# आईएमएफ संस्थया पुनः भारतस्य आर्थिकवृद्धेः सङ्केताः प्रदत्ताः

आईएमएफ इति अन्ताराष्ट्रिय मुद्रा कोषेण पञ्च-विंशत्यधिक-द्वि-सहस्र-तम-वर्षार्थ भारतस्य आर्थिक वृद्धि-परिमितेः अनुमानं संवर्ध्य प्रतिशतं दश-मलवोत्तर त्र्यधिक-सप्तमिता कृता अस्ति। विश्व-आर्थिक परिदृश्यस्य वार्तायाम् आईएमएफ-कोषेण प्रोक्तं यत् प्रवर्तमान-वित्त-वर्षस्य चतुर्थ्यां त्रैमासिक्यां सुदृढ-आर्थिक-गति-कारणेन एतत् संशोधनं कृतम् अस्ति।

# एसबीआई द्वारा - भारतीय-अर्थव्यवस्थायाः अनुमानम्

स्टेट-बैंक-ऑफ-इंडिया इत्यस्य शोध-विवरणिकायाः अनुसारेण भारते त्रिंशदुत्तर-द्वि-सहस्र-तम-वर्षं यावत् प्रतिजनम् आयः चतुस्सहस्र-डॉलर-मितः भविष्यति, येन तदानीं भारतम् उच्च-मध्यम-आययुक्तः देशः भविष्यति।

# सार्वजनिक-क्षेत्रस्य बैंकेभ्यः त्रिलक्षाधिकानि सूक्ष्म-लघु-मध्यम-उद्यमानां ऋण-आवेदनानि अनुमोदितानि सन्ति


प्रशासनेन प्रोक्तं यत् सार्वजनिक-क्षेत्रस्य बैंकेभ्यः त्रिलक्षाधिकानि सूक्ष्म-लघु-मध्यम-उद्यमानां ऋण-आवेदनानि अनुमोदितानि सन्ति, आहत्य येषां राशिः त्रिशताधिक-द्विपञ्चाशत्-सहस्र-कोटि-रूप्यकाणि आसीत्। वित्तमन्त्रालयेन उक्तं यत् एतानि ऋण-आवेदनानि गतवर्षस्य अप्रेल-मासात् दिसम्बर-मासपर्यन्तं अनुमोदितानि आसन्। सार्वजनिक-क्षेत्रस्य वित्तकोशाः गतवर्षे सूक्ष्म-लघु-मध्यम-उद्यमानां कृते डिजिटल्-पदचिह्नानां आधारेण ऋण-निर्धारण-प्रतिरूपं प्रारब्धवन्तः। एतत् प्रतिरूपं के.वै.सी. इति प्रमाणनार्थं, दूरभाष-तथा-ईमेल-सत्यापनाय, जी.एस.टी. दत्तांश-विश्लेषणाय, बैंक-लेखाविवरण-विश्लेषणाय च उपयुज्यते।

# जम्मू-कश्मीरे आतङ्कवादिभिः सह संजाते प्रतिसंघर्षे एकः सैनिकः हुतिंगतः




जम्मू-कश्मीरे किश्तवाड़-जनपदस्य चतरू-क्षेत्रे आतङ्कवादिभिः सह संजाते प्रतिसंघर्षे एकः सैनिकः हुतिंगतः। किश्तवाड़-जनपदस्य उपरिभागेषु प्रच्छन्नानां आतङ्कवादिनाम् निगडनार्थं बृहद्-अन्वेषण-अभियानम् अद्य द्वितीये दिनेपि प्रवर्तते। ह्यः चतरू-बेल्ट-क्षेत्रस्य मन्दराल-सिंहपोरा-क्षेत्रस्य च समीपे सोनार-ग्रामे अन्वेषणाभियानं प्रारब्धम् आसीत्, तदनन्तरं प्रतिसंघर्षः अभवत्, यस्मिन् अष्ट सैनिकाः व्रणिताः सूच्यन्ते।

# देशस्य २०२४-२५ तमे वर्षे विद्युत्-वितरण-संस्थाः द्विसहस्र-शत-कोटि-रूप्यकाधिकं लाभम् अर्जितवन्तः-मनोहरलाल-खट्टरः




विद्युत्-मन्त्री मनोहरलाल खट्टरः नव-दिल्ल्यां दिल्ली-परिसरस्य विद्युत्-विनियमन-उत्कृष्टता-केन्द्रस्य उद्घाटने उक्तवान् यत् देशस्य चतुर्विंशत्यधिक-द्विसहस्र-पञ्चविंशत्यधिक-द्विशततमे वर्षे विद्युत्-वितरण-संस्थाः द्विसहस्र-शत-कोटि-रूप्यकाधिकं लाभम् अर्जितवन्तः। सः सबलं उक्तवान् यत् अग्रिमे आय-व्ययक-सत्रे सरकारः विद्युत्-अधिनियमस्य संशोधनं प्रवर्तयिष्यति, येन क्षेत्रस्य हानिः निवार्यते

# पोलैंडदेशेन आतंकवादं प्रति शून्य-सहिष्णुता प्रदर्शनीया, सहैव भारतस्य प्रतिवेशी-आतंकवादसंरचनायै अपि तेन साहाय्यं न दातव्यम् - विदेशमन्त्री एस.जयशंकरः



**हिमसंस्कृतवार्ताः** - विदेशमंत्री डॉ. एस. जयशंकरः नवदेहल्यां पोलैंड देशस्य उप-प्रधानमन्त्रिणा विदेश-मन्त्रिणा च श्री रादोस्वाफ शिकोर्की वर्येण साकं शिष्टाचार-मेलनोपवेशनं व्यदधात्। उपवेशनस्य अवसरे भारत-पोलैंड-देशयोः द्विपक्षीय-सम्बन्धानां, परस्परं सहयोगस्य, समकालिका-न्ताराष्ट्रिय-प्रकरणानां च विषये विचार-विमर्शः विहितः। अस्मिन् अवसरे उभाभ्यामपि नेतृभ्यां राजनीतिक-आर्थिक-वैश्विक मञ्चेषु सहयोगस्य सुदृढीकरणे सविशेषं बलं प्रदत्तम्। उपवेशनमिदं भारत-पोलैंड-देशयोः मैत्रीपूर्णाः सम्बन्धाः नवीनोच्चतां प्रति प्रापकः महत्वपूर्णः पदक्षेपः आमान्यते। विदेशमन्त्री डॉ. एस्. जयशंकरः उक्तवान् यत् पोलैंडदेशेन आतंकवादं प्रति शून्य-सहिष्णुता प्रदर्शयितव्या, सहैव भारतस्य सीमायाः पार्श्वे आतंकवादसंरचनायै अपि तेन साहाय्यं न दातव्यम्। तेन अग्रे प्रोक्तं यत् पोलैंडदेशः भारतीयं क्षेत्रं परिचिनोति अथ च भारतस्य पारेसीम आतंकवादस्य दीर्घकालिक-संकट-विषये सम्यक्तया अवगतः अस्ति। तत्र सम्पन्ने समुपवेशने पक्ष-द्वयेनापि क्षेत्रीयं वैश्विकं च घटनाक्रम-विषये विचार-मन्थनानि कृतानि। ध्येमस्ति यदत्रावसरे डॉ. जयशंकरः प्रोदैरयत् यत् सद्य पूर्वमेव तेन न्यूयॉर्क पेरिस् स्थलेषु यूक्रेन-संकटस्य विषये भारतस्य दृष्टिकोणः अपि प्रकाशितः आसीत्। तेन स्पष्टीकृतं यत् भारतं विरुध्य चयनात्मक-लक्ष्यनिर्धारणं अन्याययुक्तं अनुचितं चास्ति। अमुना एतदपि प्रोक्तं यत् पोलैंड-देशः केंद्रीय-यूरोप-महाद्वीपे भारतस्य प्रमुखः व्यापार-सहयोगी अस्ति। द्वयोः राष्ट्रयोः मध्ये द्विपक्षीय व्यापारः सप्त-अरब डॉलर मूल्यतोपि अधिकः जातः अस्ति, यत्र विगते दशके एव प्रायः प्रतिशतं द्वि-शत-मितं वर्धनं दरीदृश्यते। भारतेन पोलैंडदेशे त्रि-अरब-डॉलर-मूल्यादपि अधिकः निवेशः कृतः वर्तते, येन तत्र नैकाः जीवाकावसराः सृष्टाः सन्ति। भारतस्य दृढा आर्थिकी वृद्धिः, महती आपण-क्षमता, निवेश-हितकर-नीतयः च पोलैंड-देशस्य व्यवसायि-जनेभ्यः भूरि अवसरान् प्रयच्छन्ति।

# HP Cabinet Decisions: हिमाचले आरभ्यन्ते हवाईसेवाः, एतासु नीतिषु परिवर्तनं भविष्यति



हिमसंस्कृतवार्ताः- शिमला। हिमाचलप्रदेश-मन्त्रिमण्डलस्य सभा सोमवासरे मुख्यमंत्री सुखविन्द्रसिंह सुक्खु वर्यस्य अध्यक्षतायां आयोजितः। अस्यां सभायां बहवः महत्त्वपूर्णाः निर्णयाः स्वीकृताः। मन्त्रिमण्डले डॉ. राधाकृष्णन- राजकीय- चिकित्सा- महाविद्यालये, हमीरपुरे अत्याधुनिकस्य कर्करोग-सेवा-केन्द्रस्य (Cancer Care Centre) स्थापनानिर्णयः कृतः। अस्मिन् केन्द्रे ११ नूतनविभागानां स्थापना, विभिन्नश्रेणीनां आवश्यकपदानां सृजनं पूरणं च अनुमोदितम्। सभायां सामाजिकसुरक्षा (पेन्शन-भत्ता) नियमाः २०१० संशोधयितुं निर्णयः कृतः, येन लाभार्थिनां सामाजिक- सुरक्षा- पेन्शनस्य समयबद्ध-वितरणं सुनिश्चितं भवेत्। तथैव, हिमाचलप्रदेशे उच्चन्यायालयस्य निर्णयानुसारं ३० एप्रिलात् पूर्वं पञ्चायतीराज- संस्थासु निर्वाचनानि भविष्यन्ति इति विषये मन्त्रिमण्डले चर्चा अभवत्।

## भू-तापीय-ऊर्जायाः राष्ट्रिय-नीतेः स्वीकरणम्

राज्ये उपलब्धानां भू-तापीय-ऊर्जा-संसाधनानाम् अन्वेषणं दोहनं च प्रोत्साहयितुं मन्त्रिमण्डले राष्ट्रीय-भूतापीय-ऊर्जानीतिं स्वीक्रियताम् इति अनुमोदनं दत्तम्। अस्याः नीत्याः कार्यान्वयनाय ऊर्जा- निदेशालयः नोडल एजेन्सी इति अनुमतः। स्वर्णजयंती- ऊर्जानीतौ २०२१ भूतापीय- ऊर्जासम्बद्ध- निर्देशान् समावेशयितुं संशोधनानाम् अपि स्वीकृतिः प्रदत्ता।

### पेट्रोल- हाईस्पीड- डीजलयोः 'अनाथ-विधवा उपकरः'

अनाथानां विधवानां च कल्याण-योजनाः सुदृढीकर्तुं, राज्ये पेट्रोल-हाई-स्पीड-डीजलयोः प्रथम-विक्रय-बिन्दौ 'अनाथ-विधवा-उपकरः' आरोपयितुम् अध्यादेश-आनयनाय मन्त्रिमण्डले स्वीकृतिः दत्ता। एषः उपकरः उपभोक्तृणाम् अतिरिक्तभारं विना एव, कल्याण-योजनानां प्रभावी- कार्यान्वयनाय पर्याप्त-वित्त-संसाधनान् सुनिश्चितं करिष्यति। सभायां मेगावाट् पर्यन्ताः चत्वारः जलविद्युत्-परियोजनाः निविदा-प्रक्रिया- समाप्तेः अनन्तरं सफल-निविदाकारिभ्यः आबंटयितुम् अनुमतिः दत्ता।

## नड्डी-क्षेत्रे एशियायाः दीर्घतमा जिपलाइन

मन्त्रिमण्डले काङ्गडा-जनपदे धर्मशालाया समीपे ४.३ कि. मी. दीर्घायाः नड्डी- जिपलाइन- परियोजनायाः निर्माणं स्वीकृतम्। अस्याः अनुमानितव्ययः ७.४१ कोटि रूप्यकाणि अस्ति। एषा एशियायाः दीर्घतमा जिपलाइन भविष्यति तथा पर्यटनस्य प्रमुखं आकर्षणकेन्द्रं भविष्यति।

## सीनियर-रेजिडेण्ट-डॉक्टर-नीतौ संशोधनम्

सीनियर- रेजिडेण्ट- डॉक्टर नीतौ संशोधनं स्वीकृतम्। अस्याः अन्तर्गतं ६६.६६% कोटा इन- सर्विस GDO/MO अभ्यर्थिभ्यः तथा ३३.३३% आसनानि प्रत्यक्ष- अभ्यर्थिभ्यः निर्धारितानि। पात्र- अभ्यर्थिनाम् अभावस्थायाम् आसनानां परस्पर- विनिमयः अपि कर्तुं शक्यते।

## पद-पूर्तिः एवं सेवानिवृत्त-राजस्व-अधिकारिणां पुनर्नियुक्तिः

राज्य- कर एवं आबकारीविभागे सहायक- आयुक्तस्य ११ पदानां पूर्तये स्वीकृतिः दत्ता। शिमलाजनपदे हीरानगरस्थिते मानसिकरूपेण दिव्याङ्ग-बालकानां आवासीयसंस्थायां विभिन्नश्रेणीनां ११ पदानि जॉब-ट्रेनीरूपेण पूरयितुं निर्णयः कृतः। तथैव, राजस्व-विभागस्य आपदा- प्रबन्धन- प्रकोष्ठे विभिन्नश्रेणीनां ११ पदानां सृजनं पूरणं च, तहसीलदारस्य ६ पदानां पूर्तिः अनुमोदिता। लम्बित-प्रकरणानां शीघ्र-निपटाराय सेवानिवृत्त-राजस्व-अधिकारीणां निश्चित-मानदेयेन पुनर्नियुक्तिः अपि निर्णीता।

## सहायक-स्टाफ-नर्स-भर्ती-नीतौ परिवर्तनम्

लोकनिर्माणविभागे जूनियर इंजीनियर (उद्यानिकी) चत्वारः पदानि जॉब-ट्रेनीरूपेण पूरयितुं निर्णयः कृतः। हमीरपुरे भरेड़ीस्थिते वॉलीबाल-छात्रावासाय ४ पदानां सृजन-पूर्तिः स्वीकृता। सहायक- स्टाफ- नर्सपदस्य नीतौ संशोधनं कृतम्। नूतनेन प्रावधानैः आयु-सीमा १८–४५ वर्षाणि निश्चितानि, तथा SC/ST एवं अन्य-पात्रश्रेणीभ्यः ५ वर्षाणाम् अतिरिक्त- अपकर्षः प्रदत्तः। पूर्वम् आयु-सीमा २१– ३२ वर्षाणि आसीत्।

## एम्स-बिलासपुर-परिसरे नूतनप्रकोष्ठः

स्वास्थ्य- अवसंरचना- सुदृढीकरणाय एम्स- बिलासपुर-परिसरे ८ अतिरिक्त- खण्डानां निर्माणस्य अनुमतिः प्रदत्ता। सतत- औद्योगिक- विकासं, रोजगारसृजनं, Ease of Doing Business वर्धयितुं, निवेश-आकर्षणाय हिमाचलप्रदेश- औद्योगिक-निवेशनीतिः २०१९ ३१ मार्च २०२६ पर्यन्तं विस्तारिता। शिमलायां ढलीस्थितं दिव्याङ्ग- बालकानां संस्थानं सैद्धान्तिकरूपेण प्रदेशसर्वकाराधीनं कर्तुं निर्णयः कृतः।

## क्रेच-वर्कर-क्रेच-हेल्पर-भर्ती SOP

राज्ये क्रेच-वर्कराणां तथा क्रेच-हेल्पराणां भर्त्यर्थं मानक-संचालन-प्रक्रिया (SOP) दिशानिर्देशाः च स्वीकृताः। पोषण-प्रोफाइलिङ्ग, खाद्यपरीक्षणप्रणाली च सुदृढीकर्तुं ४ नूतनप्रयोगशालाः कांगड़ा, मण्डी, शिमला, सोलनस्थिते बद्दीक्षेत्रे स्थापयितुं निर्णयः कृतः। सोलने कण्डाघाट- स्थित- समग्र- परीक्षण-प्रयोगशालायाः उन्नयनम्, आवश्यकपदानां सृजनपूर्तिः अपि अनुमोदिता।

## ४६ सीटरविमानसेवाः

एलायंस- एयर- एविएशन- लिमिटेड इत्यस्य दिल्ली–शिमला– दिल्ली, शिमला– धर्मशाला– शिमला मार्गेषु च ४६ सीटरविमानानां सप्ताहस्य सर्वेषु दिनेषु संचालनाय अनुमति प्रदत्ता। शिमलायां नूतनस्य आइस-स्केटिंग-रिंकस्य निर्माणम् अपि स्वीकृतम्। राजस्व-अधिकारिणां कार्यसंचालनं, ग्राम-अधिकारिणां नियुक्ति-कर्तव्य- वेतन- भत्ता- दण्ड- संबद्धप्रावधानान् विनियमयितुं हिमाचल- भूमिराजस्व- नियमाः २०२५ मन्त्रिमण्डले अनुमोदिताः।

## हिमाचले सुचारु-हवाई-सेवाः

हिमाचले हवाईसेवाः सुचारुरूपेण प्रवर्तिष्यन्ते। प्रदेशसर्वकारेण एलायंस- एयर- कम्पन्यै वायबिलिटी-गैप- फण्डिङ्ग विषये ३०–३२ कोटि रूप्यकाणां निर्गमन-निर्णयः कृतः।

दिल्ली– शिमला, शिमला– धर्मशाला, धर्मशाला–शिमला, शिमला–दिल्ली मार्गेषु च हवाईसेवाः आरभ्यन्ते। उडान-योजना-अन्तर्गतं केन्द्र- राज्य-सर्वकारयोः आर्थिकसहायता अपेक्ष्यते। रनवेसमस्या, मौसमबाधा इत्यादीन् कारणान् उद्धृत्य कम्पनी सेवाः स्थगितवती, तथा दिल्ली– शिमलामार्गे हानिः जायते इति तर्कं कृतवती। अतः विषयः अधुना अपि विचाराधीनः अस्ति।

# पश्चिमीविक्षोभस्य प्रभावात् उत्तरभारते सघनः नीहारः, हिमाचलसहितेषु एतेषु राज्येषु वर्षा- हिमपातयोः सजगता

हिमसंस्कृतवार्ताः- नवदेहली। उत्तरभारतस्य ऋतुः पुनः एकवारं परिवर्तयितुं प्रवृत्तः अस्ति। ऋतुविभागेन (IMD) दिल्लीनगरस्य अनेकेषु क्षेत्रेषु सघननीहारस्य पूर्वानुमानं कृतम् अस्ति। राजधान्याम् अधिकतमं तापमानं २५ डिग्री सेल्सियसस्य समीपे, न्यूनतमं तापमानं ८ डिग्री सेल्सियसस्य परितः च भविष्यति। ऋतुविज्ञानविभागस्य अनुसारं सोमवासरात् दिवा तापमानस्य किञ्चित् वृद्धिः भविष्यति। परन्तु एषः उपशमः दीर्घकालं यावत् स्थातुं न शक्नोति। पश्चिमहिमालयनक्षेत्रे १९ जनवरीतः नूतनः पश्चिमीविक्षोभः सक्रियः भविष्यति, येन केषुचित् क्षेत्रेषु जनवरीमासे २३ दिनाङ्कपर्यन्तं प्रचण्डवृष्टिः वा हिमपातः वा भवितुम् अर्हति। अस्याः ऋतुव्यवस्थायाः प्रभावः राजस्थान- पञ्जाब- हरियाणा- दिल्ली- उत्तरप्रदेश- बिहारप्रदेशेषु अनुभूयते। ऋतुविभागेन सचेतना दत्ता यत् वायव्यभारतस्य, उत्तरप्रदेशस्य, बिहारस्य च अनेकेषु भागेषु आगामिषु द्वित्रिदिवसं यावत् सघननीहारः स्थास्यति। यद्यपि शीततरङ्गस्य तीव्रता किञ्चित् शमनं जातम् तथापि शीतं सम्पूर्णतया न शान्तम्। न्यूनतमतापमानस्य किञ्चित् वृद्धिः सम्भवति, परन्तु शीतस्य प्रभावः स्थास्यति। १९ तः २२ जनवरीपर्यन्तं दिल्लीनगरस्य तापमाने महत्त्वपूर्णः आरोहणावरोहणं न भविष्यति, परन्तु प्रातःकाले विलम्बितरात्रौ च सघनः नीहारः स्थास्यति इति संभावना वर्तते। एतत् दृष्ट्वा ऋतुविज्ञानविभागेन जनान् सतर्काः भवन्तु इति परामर्शः दत्तः अस्ति। अग्रे पश्यन् २३ जनवरीपर्यन्तं पश्चिमे उपद्रवस्य प्रभावेण उत्तराखण्ड, राजस्थान, दिल्ली, पञ्जाब, हरियाणा, चण्डीगढ, पश्चिमोत्तरप्रदेशस्य च केषुचित् भागेषु लघुतः मध्यमवृष्टिः भविष्यति इति अपेक्षा अस्ति। जम्मूकश्मीरे, हिमाचलप्रदेशे, उत्तराखण्डे च नीहारेन सह लघुतः मध्यमपर्यन्तं वर्षा वा हिमपातः वा भवितुं शक्नोति। लद्दाखस्य, जम्मू-कश्मीरस्य, हिमाचलप्रदेशस्य च उच्चप्रदेशेषु हिमपातः सम्भवति। ऋतुविभागस्य अनुसारं जनवरीमासस्य २२ दिनाङ्कात् परं पुनः ऋतुः परिवर्तयितुं शक्नोति, समतलक्षेत्रेषु तापमानस्य न्यूनतायाः, शीतलतायाः च सम्भावना अस्ति।

# सर्वकारीय- चिकित्सालयेषु गुणवत्तापूर्णानि औषधानि उपलभ्यन्ते, शतकोटि-रूप्यकाणां निविदाः शीघ्रमेव निर्गताः भविष्यन्ति- मुख्यमंत्री



हिमसंस्कृतवार्ताः- शिमला। स्वास्थ्यविभागस्य वरिष्ठाधिकारिभिः सह सभायां मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः निर्देशं दत्तवान् यत् सर्वकारीयस्वास्थ्यसंस्थासु चिकित्सां याचमानानां रोगिणां कृते गुणवत्तापूर्णानि औषधानि उपलभ्यन्ते इति सुनिश्चितं कुर्वन्तु। सः अवदत् यत् राज्यसर्वकारः शीघ्रमेव प्रायः शतकोटिरूप्यकाणां औषधक्रयणार्थं निविदां निर्गमिष्यति, प्रतिष्ठितौषधकम्पन्यः च भागं गृह्णन्ति इति सुनिश्चितं करिष्यति। मुख्यमन्त्री उक्तवान् यत् औषधकम्पनीभ्यः प्रत्यक्षतया औषधानि क्रीयन्ते, येन सर्वकारीयचिकित्सालयेषु रोगिणः विश्वस्तरीयाः औषधानि प्राप्नुवन्ति इति सुनिश्चितं भवति। रोगिणां कृते गुणवत्तापूर्णानां औषधानां आपूर्तिः सुनिश्चित्य आवश्यकतानुसारं औषधनियमेषु संशोधनं भविष्यति इति अपि सः अवदत्। सः अवदत् यत् वर्तमानराज्यसर्वकारेण स्वास्थ्यक्षेत्रस्य उन्नयनार्थम् अनेकानि पदानि गृहीतानि। उत्तमस्वास्थ्यसेवायाः कृते गुणवत्तापूर्णानि औषधानि अत्यावश्यकानि सन्ति। राज्यस्य अन्तः जनानां कृते विश्वस्तरीयां स्वास्थ्यसेवाः प्रदातुं कार्यं प्रचलति। मुख्यमन्त्री खाद्य- नागरिक- आपूर्तिनिगमं जन- औषधि- आदि- औषधालयानां कृते अधिकृत-व्यापारिणां स्थाने प्रत्यक्षतया औषध-कम्पनीभ्यः औषधक्रयणं कर्तुं अपि निर्देशं दत्तवान्। राज्यसर्वकारे धनस्य अभावः नास्ति, परन्तु सार्वजनिकधनं केवलं जनहिताय एव व्ययितव्यम्। सभायां स्वास्थ्यसचिव प्रियंका बासु इंगटी, हिमाचलप्रदेश- राज्य- नागरिक- आपूर्तिनिगमस्य प्रबन्धनिदेशकः राजेश्वर गोयलः, विशेषसचिवः स्वास्थ्यं जितेन्द्रसंजाता, निदेशकः स्वास्थ्यसेवा डॉ. गोपाल बेरी सहिताः अन्ये वरिष्ठाधिकारिणः उपस्थिता अभवन्।

# युवाकाङ्ग्रेसस्य शक्तिं प्रदर्शनम्, विक्रमादित्यस्य समर्थनार्थं होली लॉजं प्राप्तवन्तः



हिमसंस्कृतवार्ताः- शिमला। उत्तरप्रदेश- बिहारप्रदेशयोः अधिकारिणां विषये लोकनिर्माणविभागस्य मन्त्री विक्रमादित्यसिंहस्य वक्तव्यस्य अनन्तरं हिमाचलप्रदेशस्य उष्णराजनैतिक- वातावरणं शीतलतायाः कोऽपि लक्षणं न दृश्यते। मन्त्रिणः वक्तव्येन सर्वकारस्य, संस्थायाः च अन्तः विविधाः प्रतिक्रियाः उत्पन्नाः सन्ति। इतरथा युवाकाङ्ग्रेसस्य पूर्वकार्याध्यक्षः यदुपतिठाकुरः पुनः एकवारं विक्रमादित्यसिंहस्य समर्थने बहिः आगतः। सोमवासरे यदुपतिठाकुरस्य नेतृत्वे राज्यस्य सर्वत्र युवाकार्यकर्तारः विक्रमादित्यसिंहस्य निवासस्थानं होली लॉजं प्राप्तवन्तः, एकतारूपेण विक्रमादित्यसिंहस्य, सांसदप्रतिभासिंहमहोदयायाः, पूर्वमुख्यमन्त्री स्वर्गीयस्य वीरभद्रसिंहस्य च समर्थने घोषान् उत्थापितवन्तः। अस्मिन् अवसरे विक्रमादित्यसिंहः अवदत् यत् काङ्ग्रेसपक्षस्य सिद्धान्ताः, राज्यस्य हितं च तस्य कृते सर्वोपरि वर्तते। सः अपि अवदत् यत् स्वर्गीयः वीरभद्रसिंहः यत् मार्गं अनुसृत्य राज्यस्य विकासाय दृढम् आधारं स्थापयति स्म, तस्मिन् मार्गे अग्रे गन्तुं तस्य दायित्वम् अस्ति। विक्रमादित्यसिंहः मुख्यमन्त्रिणः निर्देशानुसारं स्वविभागे उत्तरदायित्वपूर्वकं कार्यं कुर्वन् अस्ति इति अवदत्। सः अपि अवदत् यत् विभागाय आवंटितस्य बजटस्य विषये जनसमूहः अवगतः अस्ति, विकासकार्यस्य त्वरितत्तायै च प्रयत्नाः निरन्तरं भविष्यन्ति। मुख्यमन्त्री यत्किमपि आदेशं ददाति तत् पूर्णसमर्पणेन कार्यान्वितं भविष्यति। राज्यकाङ्ग्रेसस्य पूर्वाध्यक्षा पूर्वसांसदप्रतिभासिंह अवदत् यत् विक्रमादित्यसिंहेन उद्धृतानां विषयाणां विषये अनावश्यकविवादः उत्पद्यते। लघुघटनाः अवश्यं भवन्ति, सामाजिकमाध्यमेषु प्रसारितानां अपवादानां प्रवर्धनस्य आवश्यकता नास्ति। तेन विक्रमादित्यसिंहः आहतः अभवत्, अतः सा विषयान् प्रकाशयितुं बाध्यताम् अनुभवति स्म । सा अवदत् यत् मुख्यमन्त्री उत्तमं कार्यं करोति, तस्य बहवः निर्णयाः राज्यस्य लाभं कृतवन्तः। सा अवदत् यत् वयं सर्वकारेण सह स्मः। युवा कांग्रेसनेता यदुपतिठाकुरः विक्रमादित्यसिंहस्य दृढसमर्थनस्य आश्वासनं दत्तवान्। सः अवदत् यत् राज्यस्य युनः कस्यचित् विरोधाय न, अपितु विक्रमादित्यसिंहस्य समर्थनाय होली लॉजम् आगताः। सामाजिकमाध्यमेषु प्रसृताः दुर्भावनाः दूरीकर्तुं वयं मिलित्वा आगताः।

# हिमाचलप्रदेशे २३४ दिवसान् कर्तव्यात् अनुपस्थितिकारणात् प्रवक्ते अनिवार्य- सेवानिवृत्तेः दण्डः, सम्पूर्णं प्रकरणं ज्ञायताम्

हिमसंस्कृतवार्ताः- शिमला। हिमाचलप्रदेश- विद्यालय- शिक्षा- निदेशालयेन कदाचारप्रकरणे आङ्ग्लभाषा-प्रवक्ता संजीवः पासी इति नामकः शासकीय-सेवातः अनिवार्यतया सेवानिवृत्तः कृतः। अनुमतिं विना दीर्घकालं यावत् कर्तव्यात् अनुपस्थितेः आरोपाः सिद्धाः अभवन्, तदनन्तरं एषा कार्या आचरिता। विभागीय- अभिलेखानुसारं, यदा संजीवः सिरमौरस्य राजकीय- वरिष्ठ- माध्यमिक- विद्यालये दाहन इत्यत्र नियुक्तः आसीत्, तदा सः १ जून २०२२ तः ३० नवम्बर २०२३ पर्यन्तं विविधेषु चरणेषु समष्ट्या २३४ दिवसान् अनुमतिं विना कर्तव्ये अनुपस्थितः आसीत्। विभागेन एषा अनुपस्थिति विज्ञाय कृत- अनुपस्थितिः इति मन्यमाना, सीसीएस (आचरण) नियमाः १९६४ इत्यस्य नियमाणां उल्लङ्घनम् इति कृत्वा, अनिवार्य-सेवानिवृत्तेः निर्णयः स्वीकृतः।

## ४,१३,००० रूप्यकाणां वित्तीय-अपहारस्य अपि आरोपाः, अन्वेषणं प्रवर्तते

विद्यालय-शिक्षा-निदेशकः आशीषः कोहली इति अवदत् यत्, एतत् प्रकरणं गम्भीरतया गृहीत्वा सीसीएस (सीसीए) नियमाः १९६५ इत्यस्य नियम १४ अन्तर्गतं विभागीय- कार्यविधिः आरब्धा। औपचारिके विभागीय- अन्वेषणे अन्वेषण- अधिकारिणा सर्वे आरोपाः सिद्धाः इति अभिमताः। अन्वेषण-प्रतिवेदनम्, उपलब्ध- अभिलेखान् सम्यक् अवलोक्य, सक्षम-अधिकारिणा अनिवार्य- सेवानिवृत्तेः निर्णयः कृतः।अतिरिक्ततया, प्रवक्तुः कार्यकाले ४ लक्ष १३ सहस्र रूप्यकाणां वित्तीय-अपहारस्य अपि आरोपः अस्ति। अस्य विषये विभागेन ४ अक्तूबर २०२५ तिथौ पृथक् आरोपपत्रं निर्गत्य, सीसीएस (सीसीए) नियमानाम् अन्तर्गतं नवीन- विभागीय-कार्यविधिः आरब्धः। अन्वेषणमिदम् अधुना अपि प्रचलति, तस्याः निष्कर्षानुसारं पृथक् दण्डात्मक-विधिः विधास्यते।शिक्षा- निदेशकः अवदत् यत् अनुशासनं, ईमानदारी, उत्तरदायित्वं च विषये किमपि सम्झौतं न करिष्यते। सेवा-नियमानाम् उल्लङ्घनं कुर्वन्तः कस्यापि कर्मचारिणः विरुद्धं कार्यविधिः क्रियते।




# संस्कृतभारत्याः पूर्वोत्तरक्षेत्रस्य चिन्तनगोष्ठी प्रयागे सम्पन्ना



**हिमसंस्कृतवार्ताः आचार्यदीनदयालशुक्लः, प्रयागराज।** पूर्वोत्तरप्रदेशक्षेत्रस्य संस्कृतभारत्या अतीव प्रमुखा वैचारिकदृष्ट्या प्रखरा दिशाबोधिका च गोष्ठी सगौरवम् आयोजिता अभवत्। अस्याः बौद्धिकसमवेतायाः प्रधानं लक्ष्यं संस्कृतभाषायाः संरक्षणाय संवर्धनाय सार्वजनीनप्रसाराय च दीर्घकालिकीं सुनियोजितां क्रियान्वयनयोग्यां च कार्यनीतिं निर्मातुम् आसीत्। अवसरेऽस्मिन् उपस्थिताः विद्वज्जनाः सङ्घटनस्य दायित्वधारिणश्च संस्कृतं कथं पुनः लोकजीवनस्य प्राणभूता भाषा भवेत् इति विषये गभीरं चिन्तितवन्तः।
गोष्ठ्यां सर्वसम्मतः अयं मतः प्राकट्यं गतः यत् संस्कृतं केवलं शास्त्रीयग्रन्थेषु अकादमिकपरिसरेषु औपचारिकेषु अध्ययनेषु वा सीमयितुं तस्याः गौरवान्वितपरम्परास्वरूपेण सह अन्यायः भविष्यति। आवश्यकता तु इयमस्ति यत् संस्कृतं व्यावहारिकजीवनेन सामाजिकसंवादेन सांस्कृतिकचेतनया नैतिकमूल्यैः आधुनिकविज्ञानेन तान्त्रिकमाध्यमैश्च सह समन्वयं साधयित्वा जनमानसेन योजनीयम्। संस्कृतशिक्षणस्य सहजाः संवादप्रधानाः आकर्षिकाश्च पद्धतयः बालकयुवकेन्द्रितानि संस्कारात्मकानि अभियानानि संस्कृतसम्भाषणशिबिराणि तथा ग्रामनगरस्तरेषु संस्कृतसंस्कारकेन्द्राणां स्थापनं विस्तारश्च इत्येतेषु विषयेषु गहनो विमर्शो जातः।
संस्कृतभारत्याः अखिलभारतीयसङ्घठनमन्त्रिणः जयप्रकाशगौतमवर्याणां कुशले दूरदर्शिनि प्रेरणादायिनि च नेतृत्वे आयोजितायाम् अस्यां वैचारिकगोष्ठ्यां क्षेत्रीयसङ्घठनमन्त्री पण्डितप्रमोदः पूर्वोत्तरप्रदेशस्य क्षेत्रीयसम्पर्कप्रमुखः जितेन्द्रप्रतापसिंहः अवधप्रान्तस्य अध्यक्षः चन्द्रभूषणत्रिपाठिः कर्णपुरप्रान्तस्य मन्त्री डॉ.रत्नेशत्रिवेदिः, अध्यक्षः प्रो.रामनारायणद्विवेदिः मन्त्री नागेशपाण्डेयः काशीप्रान्तस्य सहमन्त्री सालिगरामत्रिपाठिश्चेत्येतेषां दायित्वधारिणाम् उल्लेखनीया सार्थका सक्रिया च सहभागिता आसीत्। सर्वे दायित्वधारिणः पूर्वोत्तरप्रदेशक्षेत्रस्य आगामिकार्ययोजनासु सङ्घटनपुनर्निर्माणे कार्यकर्तृप्रशिक्षणे जनसम्पर्कसुदृढीकरणे संस्कृतस्य जनान्दोलनस्वरूपप्रदाने च सम्बद्धेषु विषयेषु विस्तरेण परिचर्चितवन्तः गभीरं च विमृष्टवन्तः।इयं गोष्ठी प्रयागे अतीव अनुशासिते सौहार्दपूर्णे वैचारिके च वातावरणे औपचारिकरूपेण सम्पन्ना अभवत् यस्याः अध्यक्षतां संस्कृतभारत्याः अखिलभारतीयसङ्घठनमन्त्री जयप्रकाशगौतमवर्यः अकरोत्। उपवेशनस्यान्ते उपस्थिताः सर्वे पदाधिकारिणः कार्यकर्तारश्च सङ्घटनात्मिकाम् एकात्मतां भूयो दृढीकर्तुं संस्कृतभारत्याः उद्देश्यानि समाजस्य अन्तिमजनं यावत् प्रापयितुं संस्कृतस्य पुनर्जागरणञ्च राष्ट्रीयचेतनायाः अभिन्नम् अङ्गं निर्मातुं सामूहिकं सङ्कल्पं व्यञ्जितवन्तः।

# मादक-पदार्थ-निवारणार्थं जनजागरण-अभियानं तथा पदयात्रा सम्पन्ना



**हिमसंस्कृतवार्ताः- कुलदीप मैन्दोला, उत्तराखण्डम्।** आदर्श– संस्कृतग्रामे कोटग्रामे मादक– पदार्थ–निवारणविषयकं सशक्तं जनजागरण–अभियानम् आयोजितम्। अस्य अभियानस्य उद्देश्यः ग्रामवासिनः मादकपदार्थसेवनात् उत्पद्यमानानां सामाजिक– पारिवारिक– स्वास्थ्यगत– दुष्परिणामानां विषये जागरूकान् कर्तुं ग्रामं च सर्वथा मादकपदार्थमुक्तं निर्मातुम् आसीत्।अस्मिन् अवसरे सर्वसम्मत्या निर्णयः कृतः यत् ग्रामे यदि कश्चित् मादक–पदार्थस्य उपयोगे, विक्रये अथवा सञ्चये संलिप्तः गृहीतः भविष्यति, तर्हि तस्मै ₹२५,००० (पञ्चविंशतिसहस्ररूप्यकाणि) अर्थदण्डः आरोपयिष्यते तथा विधिक–कार्यान्वयनं अपि अनिवार्यतया क्रियते। वक्तृभिः स्पष्टं प्रतिपादितं यत् आदर्श–संस्कृतग्रामः सन् कोटग्रामे एतादृशानां दुष्क्रियाणां किञ्चिदपि स्थानं नास्ति।
अभियानस्य अन्तर्गतं मोरी–जखोल–मुख्यमार्गे जनजागरण–पदयात्रा अपि निष्कासिता, यस्यां ग्रामपञ्चायतस्य सर्वाः महिलाः उत्साहपूर्वकं सहभागिभूताः। पदयात्रामाध्यमेन मादक– पदार्थ–निवारणस्य सन्देशः जनसामान्येषु प्रभावीरीत्या प्रसरितः। अस्य कार्यक्रमस्य नेतृत्वं ग्रामप्रधानवर्यया संगीता रावत महोदयया, आदर्श– संस्कृत– ग्रामस्य प्रशिक्षकेन आचार्य माधव पौडेल महोदयेन च कृतम्। अस्मिन् अवसरे समाजसेवकः लायवरसिंह रावतः, हृदयसिंह रावतः, रोहिताश उनियालः, किशोर उनियालः इत्यादयः ग्रामस्य अन्ये च गणमान्यनागरिकाः उपस्थिताः आसन्। अभियानस्य समापनं ग्रामं कोटग्रामं स्थायिरूपेण मादक–पदार्थमुक्तं कर्तुं सामूहिकसंकल्पेन कृतम्।

## "लौकिकन्यायकोशः"

## "अस्नेहदीपन्यायः"

शुष्केण नीरसेन वा भावेन स्थितिः। यस्य दीपस्य तैलम् एव नास्ति सः दीपः गतप्रायः, तस्य दीप इति केवलं नामधेयम्। एतत् द्योतयितुम् अस्य न्यायस्य प्रयोगः क्रियते। यथा-
**"तत्र वर्षसहस्राणि निर्विकल्पसमाधिना। दश स्थित्वा शशामासावात्मनि अस्नेहदीपवत्।।**

**डा.वर्षा प्रकाश टोणगांवकर पुणे / महाराष्ट्रम्**



**हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः**


## वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।
**काव्या-** नमस्ते नन्दिनि। मुम्बई-नगर्याः मया एका विचित्र-वार्ता श्रुता। तत्र एकेन हास्यकलाकारेण "विद्युत्-दण्डपत्रस्य" वञ्चना दृष्टा। एकेन कपट-समूहेन आरक्षक-जालपुटम् इव दृश्यमानम् एकं कूट-जालपुटं रचितम्। किन्तु तस्य हास्यकलाकारस्य सतर्कतया तत् रहस्यं प्रकाशितम्, जनाः च सावधानीकृताः।
**नन्दिनी-** एतत् तु बहु उत्तमम्। जनैः सर्वदा जागरूकैः भूयताम्। अधुना नोयडा-नगरस्य वार्ता। तत्रत्यानां तुङ्ग-भवनानाम् एकं चित्रं जालांतराले बहु-प्रसृतम्। सान्द्र-कुज्झटिकया आवृतानि भवनानि "मेघ-नगर्याः" भागः इव दृष्टानि। केचन तत् सौन्दर्यं प्रशंसितवन्तः सन्ति, किन्तु अनेके वायु-प्रदूषणं दृष्ट्वा भीतिभूताः जाताः।
**काव्या-** आम्, तस्मिन् कज्जल-सदृशे वातावरणे जनाः भीतिभूताः जाताः स्युः। इदानीं चीन-देशस्य वार्ता श्रूयताम्। तत्र एकेन नरेण अनेके प्रौढाः द्विचक्रिका-चालने शिक्षिताः। यैः बाल्यकाले द्विचक्रिका-चालनं न पठितम्, तेषां कृते तेन एकः विशेष-वर्गः आरब्धः। अद्यपर्यन्तं सप्त-शतं जनाः तेन पाठिताः सन्ति।
**नन्दिनी-** एतत् शिक्षणं तु श्लाघनीयम्। इदानीं मुम्बई-नगर्याः एका सुवार्ता। तत्रत्यं स्थानीय-रेलयानं कदापि न विरमति इति ख्यातम्। किन्तु एकेन चालकेन प्रस्थितम् अपि यानं रोधितम्। एकया वृद्धया महिलया धावित्वा यानम् आरोढुं यत्नः कृतः। तां दृष्ट्वा दयालुना चालकेन यानं स्थगितम्, सा च अन्तः स्वीकृता। तस्य तत् कार्यं सर्वैः प्रशंसितम्।
**काव्या-** सत्यम्। तेन चालकेन उत्तमम् उदाहरणं स्थापितम्। समाजे ईदृशी दया आवश्यकी। अस्तु, अद्यतनीयाः वार्ताः अत्रैव समाप्ताः। श्वः नूतन-वार्ताभिः सह पुनः मेलिष्यावः। नमो नमः।

# कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयेन "महाकविकालिदास-संस्कृतव्रती राष्ट्रियपुरस्कारस्य" घोषणा कृता








**हिमसंस्कृतवार्ताः - डॉ रेणुका बोकारे, नागपुरम्।**

कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयः, पण्डितराम-नारायणशर्मविद्यस्य स्मृतौ पण्डितरामनारायणशर्मा आयुर्वेद-अनुसन्धानप्रतिष्ठानेन, स्थानीयजनपदप्रशासनेन तथा च महाराष्ट्रपर्यटनविकासमण्डलेन (नागपुरम्) सह मिलित्वा प्रतिवर्षं "महाकविकालिदास- संस्कृतव्रती-राष्ट्रिय-पुरस्कारम्" प्रददाति।

अस्य पुरस्कारस्य मुख्योद्देश्यं तेषां विदुषां सम्माननं वर्तते ये संस्कृतभाषायाः प्रचाराय, प्रसाराय, विकासाय, अनुसन्धानाय च स्वजीवनं समर्पितवन्तः। विश्वविद्यालयः एतान् महानुभावान् पुरस्कृतं करोति ये संस्कृतभाषां समाजे गौरवान्वितस्थानं दापयितुं अमूल्यं योगदानं दत्तवन्तः। विश्वविद्यालयेन सम्प्रति वर्ष २०२४ तथा २०२५ कृते पुरस्काराणां घोषणा कृता।

एते पुरस्काराः तिसृषु श्रेणीषु दीयन्तेः अन्ताराष्ट्रियसंस्कृतविद्वान्, वरिष्ठसंस्कृतविद्वान् तथा युवासंस्कृतविद्वान् च। अयं निर्णयः माननीयकुलगुरुणा प्रो. हरेरामत्रिपाठिमहोदयेन आहूतायां पुरस्कारचयनसमित्याः उपवेशने स्वीकृतः।

पुरस्कारविजेतृणां विवरणम् (२०२४-२०२५)

**१. अन्ताराष्ट्रियसंस्कृतविद्वच्छ्रेणी:**

२०२४: प्रो. सरोजा भाटे, पुणे (प्रज्ञापाठशालायाः अध्यक्षा, संस्कृतव्याकरणविदुषी)।

२०२५: प्रो. माधव देशपाण्डे, अमेरिका (मिशिगनविश्वविद्यालयस्य पूर्वप्रोफेसरः, व्याकरण-भाषाविज्ञानविशेषज्ञः)।

**२. वरिष्ठसंस्कृतविद्वच्छ्रेणी:**

२०२४: प्रो. कालुरी हनुमन्त राव, सिकन्दराबाद (प्रसिद्धसंस्कृतविद्वान्)।

२०२५: प्रो. कृष्णकान्त शर्मा, वाराणसी (काशीहिन्दूविश्वविद्यालयस्य पूर्वप्रोफेसरः, भारतीयदर्शनविशेषज्ञः)।

**३. युवासंस्कृतविद्वच्छ्रेणी:**

२०२४: प्रो. वीरनारायण पाण्डुरङ्गी, बेङ्गळूरु (वैदिकभाष्यकारः, पूर्णप्रज्ञापाठशालायाः निदेशकः)।

२०२५: डॉ. सचिन कठाले, नागपुरम् (कोलकसन्देशस्य सहसम्पादकः, संस्कृतप्रचारकः)।

**पुरस्कारस्य स्वरूपम्**

अस्य पुरस्कारस्य अन्तर्गतं वरिष्ठ-अन्ताराष्ट्रियविद्वद्भ्यः ५०,००० रूप्यकाणां राशिः, युवाविद्वद्भ्यः च २५,००० रूप्यकाणां राशिः प्रदीयते। एतेन सह प्रशस्तिपत्रं, अङ्गवस्त्रं, श्रीफलं च समर्प्यते। एकस्मिन् विशेषकार्यक्रमे एते सर्वे विद्वांसः सम्मानिताः भविष्यन्ति। कुलगुरुः डॉ. अतुल वैद्यः तथा कुलसचिवः डॉ. रोशन अलोने सर्वेषां पुरस्कृतविदुषां अभिनन्दनं कृतवन्तौ।

# पञ्चमहाभूताः - ब्रह्मांडीय - रचनायाः आधाराः

अस्माकं जीवने पञ्चमहाभूतानाम् अर्थात् पर्यावरणस्य अतीव महत्त्वपूर्णं स्थानम् अस्ति। एतद्विना मनुष्यः क्षणम् अपि जीवितुं न शक्नोति।जलं, पृथ्वी, वायुः, अग्निः, आकाशः इति पञ्चतत्त्वैः एव मनुष्यस्य जीवनं भवति, जीवनस्य अन्ते अपि मनुष्यः एतेषु पञ्चतत्त्वेषु एव विलीनः भवति। प्राचीनकाले मनुष्यस्य जीवनम् अतीव सरलं सात्विकं च आसीत्, वृक्षाणां वनस्पतीनां सः पूर्णश्रद्धया रक्षति स्म, येन एकं सुन्दरं स्वस्थं च वातावरणं निर्मितं भवति स्म। अद्य प्रदूषणं चिन्तायाः विषयः अस्ति। जनानां स्वास्थ्यस्य उपरि अस्य अतीव दुष्प्रभावः भवति। जनाः श्वसनरोगैः अन्यरोगैः च ग्रस्ताः भवन्ति। वयं समाचारपत्रेषु पठामः यत् 'ग्लोबल वार्मिंग' (वैश्विकतापमानस्य) समस्या निरन्तरं वर्धते।अस्माभिः अपि अस्मिन् विषये गम्भीरतया विचारः करणीयः। प्रकृतेः शोषणं विना प्राकृतिकं सन्तुलनं स्थापयितुम् आवश्यकम् अस्ति।

## पर्यावरणरक्षणस्य उपायाः-

१. अस्माभिः सर्वत्र अधिकं वृक्षारोपणं प्रति जागरुकता उत्पादनीया। वनानाम् अरण्यानां च रक्षां कुर्वन्तु।

२. बालस्य जन्मदिवसे तस्य हस्तेन लघुपादपाः रोपयित्वा तं पर्यावरणस्य महत्त्वं प्रति बोधयेत्।

३. जलस्य भण्डारः सीमितः अस्ति इति मत्वा सर्वान् वदनीयम्, जलप्रबन्धनम् इत्यादि करणीयम्। भूजलस्तरं वर्धयितुं वर्षाजलस्य भूमौ सञ्चयस्य व्यवस्थां कुर्वन्तु। समाजे 'वर्षाजल- सञ्चयनं' प्रति जागरुकतां जागृतं कुर्वन्तु।

४. बहवः जनाः अस्मिन् विषये न ध्यानं ददति, यत्र कुत्रचित् मार्गे वा गृहस्य समीपे वा अवकरं क्षिपन्ति। अस्वच्छतया बहवः रोगाः भवन्ति ये अस्माकं स्वास्थ्याय हानिकारकाः सन्ति। अवकरस्य दहनेन वायुप्रदूषणं भवति, अतः तस्मिन् विषये जनजागरणं कुर्वन्तु।



**हिमसंस्कृतवार्ताः, डॉ. विदुषी अग्रावालः**

५. प्लास्टिक-अवकरः प्रसृतं प्रदूषणं यः भवति तस्य महती चिन्ता अस्ति, यतः एतत् पर्यावरणस्य अतीव हानिं करोति।

6. साधारणदीपकान् 'एलईडी' दीपकैः परिवर्तयन्तु।

7. दन्तधावनसमये, वस्त्राणां पात्राणां च प्रक्षालनसमये जलनलिकान् स्थगयन्तु। कार्यसमाप्तिपर्यन्तं जलस्य प्रवाहः तस्य नाशं करोति।

8. उत्सवेषु समारोहेषु च प्लास्टिक-निर्मितपात्राणां स्थाने स्टीलस्य अथवा काचस्य पात्राणाम् उपयोगं कुर्वन्तु।

9. प्रवाससमये जलस्य नूतनं प्लास्टिक-कूपीं क्रेतुम् अपेक्षया गृहात् स्टीलस्य काचस्य वा कूपीं नयन्तु।

10. गृहस्य प्रत्येकं सदस्यः न्यूनतिन्यूनम् एकं वृक्षं आरोपयेत्। एतद् युष्माकं क्षेत्रं हरितं शीतलं च स्थापयितुं साहाय्यं करोति।

11. समीपस्थानं गन्तुं कारयानस्य उपयोगं मा कुर्वन्तु। पादाभ्यां चलन्तु अथवा द्विचक्रिकया गच्छन्तु, येन स्वास्थ्यं समीचीनं भविष्यति प्रदूषणं च न भविष्यति।

12. दीर्घयात्रायाः कृते सार्वजनिक-परिवाहनस्य उपयोगं कुर्वन्तु।

13. आपणं गन्तुं वस्त्रस्यूतस्य प्रयोगं कुर्वन्तु।

14. आवश्यकता नास्ति चेत् गृहे, कार्यालये, रेलयाने च व्यजनानि दीपकान् च निर्वापयन्तु।

15. देवीस्वरूपां जीवनदायिनीं नदीं प्रदूषितां मा कुर्वन्तु। अवकरं नद्यां मा क्षिपन्तु। निर्माल्येन 'कम्पोस्ट' इति जैविकखादं निर्मातुं जनान् प्रेरयन्तु।

16. तीव्रध्वनिः रोगान् आमन्त्रयति। अतः 'हेडफोन' इत्यस्य वा उच्चध्वनौ सङ्गीतस्य श्रवणं मा कुर्वन्तु।

**'यदि वयं पर्यावरणं रक्षिष्यामः तर्हि पर्यावरणम् अस्मान् रक्षिष्यति।'**